कर्तव्यमेतच्च करोमि नित्यम्।।

द्वितीयः पाठः

# कोऽरुक्

## आमुखम्

कोट्टारत्तिल् शङ्कुण्णिमहाशयः कोट्टयं जिल्लायाम् 1855 तमे वर्षे जन्म लेभे। तस्य पिता वासुदेवनुण्णि महाशयः। शङ्कुण्णिमहाभागः बाल्ये 'तङ्कु' इति आहूतः कालक्रमेण 'शङ्कु' इति नामधेयः अभूत्। 'उण्णि' इति जातिवाचकं शब्दमपि योजयित्वा 'शङ्कुण्णि' इति नाम अजायत। वयस्कर आर्यन् नारायणन्मूस्सत् तस्य आचार्यः आसीत्। अनेके ग्रन्थाः शङ्कुण्णिमहाशयेन विरचिताः भवन्ति। 1904 तमे वर्षे कोच्चिराजेन 'कवितिलकः' इति बिरुदेन सम्मानितोऽभूत्।

सुभद्राहरणम्, लक्ष्मीभायीशतकम्, आसन्नमरणचिन्ताशतकम् इत्यादयः मणिप्रवालग्रन्थाः नैषधम्, विश्वामित्रचरितम्, क्षेत्रमाहात्म्यम् इत्यादयः गद्यप्रबन्धाः, श्रीभूतनाथोद्भवम्, कल्याणमहोत्सवम्, श्रीशङ्करविलासः इत्यादयः तुल्लल्साहित्यग्रन्थाः च तेन विरचितेषु प्रसिद्धाः। तेन रचितः 'ऐतिह्यमाला' नामकः ग्रन्थः अतीव प्रसिद्धः भवति। 'इति' इत्यस्य अर्थः 'एवम्', 'ह' इत्यस्य अर्थः 'प्रसिद्धम्' इति च। अनयोः पदयोः मेलनेन 'इतिह' इति पदं जातम्। इतिह इत्यस्य भावः ऐतिह्यम्। ग्रन्थेऽस्मिन् वर्णिताः कथाः कर्णाकर्णिकया प्रसिद्धाः आसन्। ऐतिह्यमालायाः उद्धृता काचन कथा अत्र पाठपुस्तके दत्ताऽस्ति।

**पाठस्य नाम - कोऽरुक् ।**

**आशयः - केरलीयम् आयुर्वेदपारम्पर्यमधिकृत्य सामान्यपरिचायनम्।**

**उद्देश्यम् - वाचननैपुणी, कथाकथननैपुणी।**

**सन्दर्भानुसारं सम्भाषणपाटवम् आर्जयति।**

**+´ªÉÉªÉÉ{ÉÉnÉxÉÉ Ê´É´ÉSÉxÉ¨É*"**

## +ÉvÉÉ®ÉÉxÉ& - BÊiÉÁ¨ÉÉ±ÉÉ (EòÉ]õ]õÉ®ÊkÉ±É ¶ÉRóEòÊhÉ)

**कालांशः - 14**

| आशयः/ धारणाः/ व्यवहाररुपाणि | पठनप्रवर्तनानि/ पठनतन्त्राणि | पठनाधिगमाः |
|---|---|---|
| कथानां सामान्यपरिचायनम्।<br>कथाकथनम् | कथावचनम्<br>विग्रहवाक्यलेखनम्<br>परिचितकथानां अवतारणम्।<br>क्रियापदानां लेखनम्। | कथां उच्चैः वाचयति। कथां पठित्वा आशयं वदति लिखति च। कथाः अवतारयति क्रियापदानि परिवर्त्य लिखाते। |

**प्रवर्तनम् -1 कथाकथनम्।**

**उद्देश्यम् - वाचननैपुणी, कथाकथननैपुणी।**

**प्रक्रिया :-**

'कोऽरुक्' इति कथा कक्ष्यायाम् अवतारणार्थं सम्यक् पठनीया। प्रथमं छात्रान् सङ्घान् करोतु। ततः अध्यापकः संश्लिष्टपदचयनाय प्रवर्तनं कक्ष्यायाम् आयोजयतु।

पाठभागं सम्यक् पठित्वा संश्लिष्टपदानां चयनाय छात्रान् प्रेरयतु। चितानि पदानि कक्ष्यायाम् अवतारयन्तु। ततः छात्राः पदच्छेदं कृत्वा लिखन्तु। पाठपुस्तके दत्तैः पदच्छेदैः सह तुलयन्तु। परिष्करणम् आवश्यकं चेत् परिष्कृत्य टिप्पणिपुस्तके लिखन्तु। कक्ष्यायाम् अवतारयन्तु। अवतारणसमये अध्यापकः फलके लिखतु। समानसन्धियुक्तानि पदानि विविच्य लेखनाय श्रद्धा देया।

यथा - गतौ + इव - गताविव

समर्थौ + अपि - समर्थावपि।

नूतनपदचयनम् अर्थलेखनं च।

कथां पठित्वा नूतनपदानि चित्वा लिखन्तु। ततः शब्दकोशस्य साहाय्येन अर्थलेखनाय निर्दिशतु। सङ्घे चर्चित्वा लिखितानि कक्ष्यायाम् अवतारयन्तु। अनन्तरं कथां कक्ष्यायाम् अवतारयन्तु छात्राः। सभाकम्पं विना आशयव्यक्ततया कथाकथनशैलीं स्वीकृत्य अवतारणाय प्रेरयतु। मूल्यनिर्णयमपि करोतु।

**प्रवर्त्तनम्-2 कथायाःसंग्रहणम्।**

**उद्देश्यम् - आशयग्रहणम्/संग्रहणक्षमता।**

प्रक्रिया - छात्रान् सङ्घद्वयं करोतु। पाठभागं सम्यक् पठित्वा यावच्छक्यं प्रश्नानां निर्माणाय निर्दिशतु। ततः प्रथमसङ्घः द्वितीयसङ्घं प्रश्नान् पृच्छति। द्वितीयसङ्घः प्रश्नस्य उत्तरं ददाति। यदि उत्तरदाने द्वितीयसङ्घः असमर्थः भवेत् तर्हि प्रथमसङ्घेन एव प्रश्नस्य उत्तरं दातव्यम्। अनन्तरं द्वितीयसङ्घः प्रथमसङ्घं प्रति प्रश्नान् पृच्छति। (एतदनुवर्तते।) अध्यापकेन अवश्यं साहाय्यं च देयम्।

**केचन प्रश्नाः अधः दीयन्ते।**

1. आलत्तियूर् नम्पी कः?
2. कः अरुक्?
3. वैद्यस्य प्रतिवचनेन खगौ किमकुरुताम्?
4. ग्रामीणः केन कारणेन गृहं प्राप्तवान्?
5. बालकौ ग्रामीणं किम् अकुरुताम्?
6. वैद्यपुत्रः पित्रे किं न्यवेदयत्?
7. शिष्यौ कौ आस्ताम्?

अनन्तरं कथासंग्रहलेखनाय छात्रान् निर्दिशतु। प्रवर्तनमिदं व्यक्तिगतं भवति। लेखनानन्तरं द्वित्रान् अवतारणाय प्रेरयतु। अध्यापकः श्यामफलके लिखतु। छात्राः टिप्पणिपुस्तके लिखन्तु। अध्यापकः मूल्यनिर्णयमपि करोतु।

**आदर्शरूपेण कथासंग्रहः अधः दीयते।**

आलत्तियूर् नम्पी प्रतिदिनं प्रभाते मन्दिरं गच्छति स्म। मार्गे वृक्षशाखायाम् उपविशन्तौ पक्षिणौ 'कोऽरुक्, कोऽरुक्' इति रटतः स्म। एकस्मिन् दिने नम्पी, 'यः यथाकालं

हितमितभोजी, यः भोजनानन्तरं कञ्चित्कालं संक्रामति, यः वामभागेन शेते, यः मूत्रपुरीषादीन् यथाकालं विसृजति, यः स्त्रीषु संयमितात्मा भवति सः अरुक्' इत्यर्थप्रतिपादकं श्लोकम् आलपत्। वैद्यस्य उत्तरं श्रुत्वा तौ पक्षिणौ अप्रत्यक्षौ आस्ताम्। कतिपयदिनानन्तरं द्वौ बालकौ आयुर्वेदपठनार्थं वैद्यस्य गृहम् आगच्छताम्। तौ शिष्यत्वेन स्वीकृत्य पाठनमारभत च।

एकदा शिरोवेदनया पीडितः कश्चन ग्रामीणः वैद्यस्य गृहमागच्छत्। तदा गुरुः तत्र नासीत्। तौ शिष्यौ रोगहेतुं विज्ञाय तस्य कपालमुत्पाट्य प्रतिक्रियाम् अकुरुताम्। प्रत्यागतः गुरुः समस्तं रहस्यं ज्ञातवान् इति मत्वा ततः गन्तुमुद्युक्तौ शिष्यौ अश्वनीकुमारौ इति स्वयं परिचाय्य आगमनवृत्तान्तं तस्मै न्यवेदयताम्।

**प्रवर्त्तनम् -3 - संभाषणरचना।**

**उद्देश्यम् - सन्दर्भानुसारं सम्भाषणपाटवम् आर्जयति।**

**प्रक्रिया :-**

वैद्यभवनात् जिगमिष्वोः बालकयोः वैद्यस्य च मिथोभाषणं सम्भाव्य लेखनाय छात्रान् द्वयाङ्गसङ्घान् करोतु। ततः सम्भाषणलेखनाय प्रेरयतु। अध्यापकः यथायोग्यं साहाय्यमपि सङ्घेभ्यो ददातु। अनन्तरं सङ्घाः कक्ष्यायाम् अवतारयन्तु। मूल्यनिर्णयमपि करोतु।

**बालकयोः वैद्येन सह भाषणम्**

बालकौ - भो आर्य। आवां गन्तुमिच्छावः।
नम्पी - युवां केन कारणेन गन्तुमिच्छन्तौ?
बालकौ - आवयोः चिकित्सारीतिः भवता ज्ञाता।
नम्पी - तेजस्विनौ भवन्तौ कौ? कुत्र गच्छथ?
बालकौ - आवाम् अश्वनीदेवौ स्वः। प्रतिगन्तुम् इच्छावः।
नम्पी - किमर्थम् अत्र आगतवन्तौ?
बालकौ - आयुर्वेदशास्त्रस्य प्रचारणार्थम् आगतवन्तौ ।
नम्पी - धन्योऽस्मि। माम् अनुगृह्णताम्।
बालकौ - (विशिष्टमेकं ग्रन्थं नम्पिहस्ते दत्वा)
"सर्वथा विजयी भव।"
नम्पी - धन्योऽस्मि।

**प्रवर्त्तनम् - 4 कथांशानां क्रमीकरणम्।**

**उद्देश्यम्** - **विवेचनबुद्ध्या प्रवृत्तिः करणीया।**

**प्रक्रिया -**

अध्यापकः कथांशान् श्यामफलके/चाट्र्पत्रे विलिख्य प्रदर्शयतु। छात्राः कथांशान् क्रमीकृत्य टिप्पणिपुस्तके लिखतु (व्यक्तिगतप्रवर्तनमिदम्)। अथ कक्ष्यायाम् अवतारयन्तु। छात्रैः क्रमीकृत्य लिखितं कथास्तंभं परीक्षताम्। क्रमीकृतं कथास्तम्भं कक्ष्यायां प्रदर्शयतु।

- आलत्तियूर् नम्पी प्रतिदिनं कुलदेवतामन्दिरं गच्छति स्म।
- कोऽरुक् इति रटन्तौ खगौ अपश्यत्।
- तौ शिष्यत्वेन स्वीकृत्य वैद्यः पाठनमारभत।
- कश्चन ग्रामीणः शिरोवेदनया वैद्यस्य गृहं प्राप्तवान्।
- मस्तके औषधलेपनम् अकुरुताम्।
- वैद्यपुत्रः सर्वमपि वृत्तान्तं पित्रे न्यवेदयत्।
- आलत्तियूर् नम्पी अष्टवैद्यानां मध्ये प्रमुखं स्थानम् अवाप।

**प्रवर्त्तनम् 5 -चर्चा कृत्वा टिप्पणीलेखनम्।**

**उद्देश्यम्** - टिप्पणीलेखनसामर्थ्यम्।

**|ÉÊGòªÉÉ -**

+ÉÉ®ÉMªÉ´ÉiÉÉ ±ÉI ÉhÉ ÊEò¨É <ÊiÉ Ê´É¹ÉªÉ¨ÉÉvÉÉ®ÉòEòiªÉ ±ÉPÉÊ]ÉÒ{{ÉhÉÒ±ÉJÉxÉÉªÉ ºÉRóPÉSÉSÉÉ +É´É¶ªÉEòÒ* iÉnlÉ UÉjÉÉxÉ ºÉRóPाान् करोतु। मासिकीभ्यः स्वीकृताः/पूर्वं सज्जाः/अन्तर्जालस्य साहाय्येन वा आरोग्यसम्बन्धिं लघुलेखाः सङ्घेभ्यो वितरतु। छात्राः लघुलेखां पाठपुस्तकस्थं श्लोकं च पठित्वा टिप्पणिं लिखन्तु। अध्यापकः अवश्यं साहाय्यमपि ददातु। कक्ष्यायाम् अवतारयन्तु। अध्यापकः मूल्यनिर्णयमपि करोतु।

शारीरिक-मानसिकारोग्यपरिपालनविषये आहारस्य प्राधान्यमस्ति। शरीरप्रकृतिः, वयः, वृत्तिः, परिस्थितिः, इत्यादीनि अनुसृत्य शीघ्रपचनयोग्यानि भोज्यानि उपयोक्तव्यानि। हितःमितः च आहारः आरोग्यपरिपालनाय उपकारकः भवति। पर्याप्तः व्यायामः कार्यः।

तथैव शयनवेलायां वामेन भागेन शयनं कार्यम्।

अधुना कालनिष्ठां विना प्रायः सर्वे जिह्वालौल्येन वैविध्यपूर्णम् आहरन्ति। किन्तु ते न जानन्ति तानि शरीरस्य दोषाय भविष्यन्ति इति। आरोग्यस्य अधिष्ठानं शरीरं भवति। अतः आरोग्यसंरक्षणाय पूर्वोक्तान् निर्देशान् पालयन्तु।

**प्रवर्त्तनम् - 6 अव्ययपदचयनं पट्टिकापूरणं च।**

**उद्देश्यम् - अव्ययपदानां विवेचनम्।**

**प्रक्रिया -**

छात्रान् सङ्घान् कृत्वा पाठभागस्य वाचनाय प्रेरयतु। प्रथमः सङ्घः क्त्वान्तानि, द्वितीयः सङ्घः ल्यबन्तानि, तृतीयः सङ्घः तुमुन्नन्तानि, चतुर्थः सङ्घः अन्यानि अव्ययानि च चिन्वन्तु। ततः एकैकः सङ्घः कक्ष्यायाम् अवतारयतु। अध्यापकः श्यामफलके कोष्ठकं निर्माय लिखतु। परिष्करणम् आवश्यकं चेत् परिष्कृत्य लिखतु-

| क्त्वान्तानि | ल्यबन्तानि | तुमुन्नन्तानि | अन्यानि |
|---|---|---|---|
| श्रुत्वा | स्वीकृत्य<br>आनीय | गन्तुम् | तु, नत्वा<br>यदा-तदा |
| | विज्ञाय | | इति |
| | उद्घाट्य | | च |
| | निर्माज्र्य | | एवं |
| | समेत्य | | पुनः |
| | निलीय | | अपि |
| | | | पुरा |
| | | | तत्र, अत्र ,एवं |

छात्राः टिप्पणिपुस्तके लिखन्तु।

**प्रवर्त्तनम् - 7 कथायाः समाहरणम्**

**उद्देश्यम्** - **समाहरणपटुता।**

**प्रक्रिया** :- वैविध्यपूर्णानां तिसृणां कथानां समाहरणाय छात्रान् निर्दिशतु। तैः आनीतानां कथानां मूल्यनिर्णयं करोतु। कक्ष्यायाम् अवतारयन्तु छात्राः। ततः सम्पुटम् आरचयतु।

(आधारग्रन्थसूची- ऐतिह्यमाला, बीरबल्कथाः, ग्रामीणकथाः, तेन्नालिरामन्कथाः, अरबिक्कथाः, विक्रमादित्यकथाः, बैबिल्कथाः )

## तोलकविः

केरलीयब्राह्मणकुले जातः तोलकवेः मातापितरौ कौ? यथार्थनाम किम्? स्वदेशं कुत्र इत्यादीनि कार्याणि यः कोऽपि न जानाति। तस्य बाल्ये एव पिता मरणमुपगतः। तदाप्रभृति सः मात्रा सह जीवति स्म। तोलकविः असामान्यबुद्धिशाली, युक्तिशाली, विदूषकः उपहासशीलश्चासीत्। तं प्रति प्रचुरप्रचारमाप्ताम् एकां कथां श्रुण्वन्तु।

तोलकवेः बाल्ये एकदा माता तस्मै भोजनं परिवेषयन्ती आसीत्। तोलः भोजनं खादन्नपि तस्य श्रद्धा धान्यकोशे आसीत्। कुत इति चेत् तेषां 'चक्की' नाम परिचारिका धान्यचोरणार्थं धान्यकोशसमीपे तिष्ठन्ती आसीत्। "यदा माता पुत्रः च भोजनं खादति तस्मिन्नेव काले धान्यकोशात् चोरणं करिष्यामि" इति सा अचिन्तयत्। सा धान्यसम्भरणीं ( 'പത്തായം' )इति कैरल्याम् )शनैः शनैः प्रविशति स्म। तदानीन्तनकाले भोजनवेलायां ब्रह्मचारिभिः तूष्णीं भूत्वा भोजनं करणीयम् इति व्यवस्था आसीत्। यदि सम्भाषणं करिष्यति तर्हि तत् संस्कृतभाषायाम् एव कार्यम् इत्यप्यासीत्। "बालस्य तोलस्य संस्कृतपरिज्ञानं नास्ति, तस्मात् मम 'पत्ताय' प्रवेशनम् अधिकृत्य मातरं वक्तुं सः न प्रभवति" इति चक्की अचिन्तयत्। सा 'पत्तायस्य" अन्तः प्राविशत्। एतत् दृष्ट्वा तोलः स्वस्य बुद्धिं युक्तिं च उपयुज्य मातरमवदत् -

"पनसि दशायां पाशि" इति।

कैरल्यां पनसम् इत्यस्य ‘चक्का’ (ചക്ക) इति, पाशः इत्यस्य ‘कयर्’ (കയർ) इत्यपि व्यपदेशः। चक्कि (ചക്കി) इति आशयद्योतनाय ‘पनसि’ इत्युक्तं तोलेन। ‘പത്തായത്തിൽ’ इति कथनार्थं ‘दशायाम्’ (ദശായം -പത്തായം)इति, प्राविशत् इत्यर्थे ‘കയറി’ इति कथनार्थं ‘पाशि’ इत्यापि तेनोक्तम्। तोलस्य माता अपि समर्था बुद्धिमती चासीत्। तोलेन कथितस्य वाक्यस्य अर्थं पूर्णतया गृहीत्वा सा चक्क्याः चौर्यम् अग्रहीत्।

एतादृश्यः बह्व्यः कथाः तोलकविमधिकृत्य प्रचलिताः सन्ति।

(अवलम्बम् -ऐतिह्यमाला)

## न लोकः पारमार्थिकः

दक्षिणभारते कश्चित् ग्रामः। तत्र रामदासः नाम साधुः पर्णशालायाम् अवसत्। सः भिक्षाम् अटन् जीवनम् अयापयत्। काशीं गत्वा गङ्गायां स्नानं तस्य महती इच्छा आसीत्। तदर्थं भिक्षाटनात् लब्धेषु कांश्चित् नाणकान् ताम्रघटे निक्षिप्य ररक्ष। यदा कुम्भः नाणकैः पूर्णः तदा सः काशीं प्रस्थितवान्। पद्भ्यां चरन् सः काशीं प्राप।

स्नानाय गङ्गातीरं प्राप्तः रामदासः ताम्रघटं चोरात् रक्षितुम् उपायमचिन्तयत्। गङ्गापुलिनं खनित्वा घटं निक्षिप्य तद् सिकतया प्रच्छादितवान्। अनन्तरं कुत्र घटं गुप्तमिति ज्ञातुं घटस्योपरि सिकताभिः स्तूपिकां निर्माय स्नातुम् अगच्छत्।

स्नानार्थमागताः अन्ये रामदासेन निर्मितं स्तूपं शिवलिङ्गमिति मत्वा शिवलिङ्गानि निर्माय स्नानाय गङ्गामवातरन्। स्नानादिकं समाप्य आगतः रामदासः शिवलिङ्गशतं ददर्श। स्वीयं ताम्रघटं कुत्र इति ज्ञातुं क्लेशम् अन्वभवत्। सः आत्मनः दुरवस्थां जानन्नेवं विललाप।

“गतानुगतिको लोको न लोकः पारमार्थिकः।
गङ्गासैकतलिङ्गेन नष्टं मे ताम्रभाजनम्।” इति।।

(ग्रामीणकथा)

## बुद्धिपरीक्षणम्

एकदा अक्बर्चक्रवर्ती विद्वद्भिः सह कुशलप्रश्नं कुर्वन्नवर्तत। तदा “एकैकः स्वस्य बुद्धिशक्तिं सोदाहरणं वर्णय” इति अक्बर् तान् आज्ञापयामास। वीरबलं विना सर्वे विद्वांसः अतीतकालचरितानि सविस्तरम् अकथयन्। सर्वं श्रुत्वा अक्बर्चक्रवर्ती एवमवदत्

- "साधु, साधु! अधुना अहमेकं परीक्षणं कर्तुम् इच्छामि। तेन मार्गेण बुद्धिमतां वरिष्ठं निश्चिनुमः" इति।

चक्रवर्ती भूमौ कांचन रेखाम् अरचयत्। 'रेखामिमां मार्जनं स्पर्शनं वा विना लघ्वीकुरु' इति तान् अवदत्। पण्डितम्मन्याः ते विनोपायं तूष्णीमतिष्ठन्। कतिपयहोरानन्तरं वीरबलः मन्दमुत्थाय चक्रवर्तिनं विलोक्य कृतस्मितः सन् रेखायाः अधः दीर्घामेकां रेखाम् व्यरचयत्। एवं चक्रवर्तिना रचिता रेखा लघ्वी जाता। विद्वज्जनाः इति स्वयं मन्वानः सर्वे लज्जिताः अवनतशीर्षाः अभवन्। राज्ञा पुरस्कृतः वीरबलः सर्वैर्बहुमानितश्चासीत्।

अवलम्बं
(बीर्बल् कथाः)

**प्रवर्त्तनम्** - 8 **चिकित्साविधीनां नामलेखनम्।**

**उद्देश्यम्** - **अनुसन्धाने पाटवम्।**

**प्रक्रिया :-**

छात्राः यावच्छक्यं चिकित्साविधीन् अधिकृत्य अवगच्छन्ति इति ज्ञातुम् एकैकः छात्रः एकैकं चिकित्साविधिम् अवतारयतु। अध्यापकः क्रोडीकरोति।

1. आयुर्वेदः - आयुस्सम्बन्धी वेदः भवति आयुर्वेदः। आयुषो वेदः आयुर्वेदः इति तस्यार्थः। भारतीयचिकित्साशास्त्रस्य नाम आयुर्वेदः इति प्रथितम्। आयुर्वेदचिकित्सायां सुश्रुतसंहिता, चरकसंहिता, अष्टाङ्गसंग्रहः, अष्टाङ्गहृदयश्च प्रशस्ताः ग्रन्थाः।
2. अलोप्पति - अलोप्पतिचिकित्सा यवनदेशेषु आविर्बभूव। एकोनविंशतिशतकात्पूर्वमेव चिकित्सारीतिरियं प्रचलिता।
3. होमियोप्पति - होमियोप्पतिचिकित्सारीतिः डा. सामुवल् हानिमन् महाभागेन उपज्ञाता। अस्य कालः 1755-1843 भवति।
4. युनानि - देहल्यां सुल्तान् शासनकाले एव अस्य आविर्भावः। द्वादशशतके अरबिदेशात् आगतोऽयम् सम्प्रदायः।

5. सिद्धचिकित्सा - प्राचीनतमा चिकित्सारीतिः इयम्। दक्षिणभारते तमिल्देशे द्रवीडसंस्कारात् उत्पन्नायाः प्राचीनचिकित्सारीतेः उपज्ञाता अगस्त्यमुनिः इति गण्यते। मुनिना अष्टादशमुनीनां कृते रीतिमिमाम् उपदिदेश।

रैक्कि, प्रकृतिचिकित्सा,अक्युप्रषर्, सुजोक्, मूत्रचिकित्सा इत्यादयः चिकित्सारीतयश्च प्रसिद्धाः भवन्ति।

**अधिकविस्तरः**

**अष्टवैद्याः**

पुलामन्तोल् मूस्स्, कुट्टञ्चेरि मूस्स्, आलत्तियूर्नम्पी, पष़नेल्लिप्पुरत्तु तैक्काट्टु मूस्स्, एलंडत्तु तैक्काट्टुमूस्स्, वेल्लोटुनम्पूतिरि, चिरट्टमण्मूस्स्, वयस्करमूस्स्।

**श्लोकस्याशयः**

काले हितमितभोजी .............।

*വേണ്ടുന്ന കാലത്ത് ഹിതമായും മിതമായും ഭക്ഷിക്കുന്നവനും, ഊണുകഴിഞ്ഞാൽ കുറച്ചു നടക്കുന്നവനും ഇടതുവശം ചെരിഞ്ഞു കിടക്കുന്നവനും മലമൂത്രങ്ങളെ തടുക്കാതെ വേണ്ടുന്ന സമയത്ത് വിസർജ്ജിക്കുന്നവനും സ്ത്രീകളിൽ അത്യാസക്തി ഇല്ലാത്തവനും ആരോ അവൻ രോഗമില്ലാത്തവനായിരിക്കും.*

**व्याकरणविशेषः**

मध्येमार्गम् - मार्गस्य मध्ये इति विग्रहः। **'पारे मध्ये षष्ठ्या वा'(2-1-17)** इति सूत्रेण समासे विकल्पेन मध्यशब्दस्य पूर्वनिपातः। मार्गमध्ये इत्यपि साधु।

*शुद्धिपत्रम्- पाठपुस्तके समर्पयत् इत्यत्र समार्पयत् इति शुद्धःपाठः स्वीकर्तव्यः*

# तृतीयः पाठः
# सुखदो व्यायामः

## आमुखम्

सर्वे भवन्तु सुखिनः
सर्वे सन्तु निरामयाः।
सर्वे भद्राणि पश्यन्तु
मा कश्चित् दुःखभाग् भवेत्।।

आरोग्यं मनःशान्तिः च जीवितस्य आधारे। यदा आरोग्यं क्षीयते तदा मनःशान्तिरपि क्षीयेत। मनःशान्तिः नास्ति चेद् आरोग्यमपि नश्यति। एते परस्पराश्रिते।

भारतीयेषु षड्दर्शनेषु अन्यतमं भवति योगदर्शनम्। चित्तवृत्तिनिरोधः योग इति पतञ्जलिमहर्षिणा उक्तम्। न केवलं शारीरिकारोग्याय किन्तु भयं व्यसनं क्षोभम् असूया आसक्तिः इत्यादीनां चित्तवृत्तीनाम् शमनाय च योगविद्या उपकरोति।

योगदर्शनस्य आधारग्रन्थः पातञ्जलयोगसूत्रम्। तस्मिन् चत्वारः अध्यायाः सन्ति। समाधिपादः विभूतिपादः साधनापादः कैवल्यपादश्च। समाधिपादे अष्टविधयोगचर्याणां प्रस्तावोऽस्ति। यम-नियम-आसन-प्राणायाम-प्रत्याहार-धारणा-ध्यान-समाधिरूपाः अष्टविधयोगचर्याः। यमनियमानन्तरम् आसनानां प्रस्तावः। **स्थिरसुखमासनम्** इति आसनस्य निर्वचनम्। आसनानि अधिकृत्य विवरणं पाठभागेऽस्मिन् आयोजितम्।

**पाठस्य नाम** -सुखदो व्यायामः।

**आशयः** - योगसनानां सामान्यपरिचायनम्।

**पठननैपुणी** - आरोग्यसंरक्षणे आसनानां प्राधान्यं जानाति।
उपन्यासलेखनम्।

ºÉ½ÉªÉEÒOÉxlÉÉ& - {ÉÉiÉ\VÉ±ÉªÉÉMÉºÉjÉ¨É* ´ªÉÉºÉ¦ÉÉ¹ªÉ¨É-¦ÉÉVÉ´ÉÊkÉ®ÉiªÉiÉªÉÉºÉ¨ÉiÉ¨É

PÉ®hbºÉÊ½iÉÉ*

½`ªÉÉMÉ|ÉnÒÊ{ÉEÒ* º´ÉÉi¨ÉÉ®É¨ÉEÒiÉ¨É*

®ÉVÉªÉÉMÉ¨É -º´ÉÉ¨ÉÒ Ê´É´ÉEÒxÉxn&* ¸ÉÒ®É¨ÉEÒ¹hÉÉ¸É¨ÉÉiÉ |ÉÊºÉr ÒEÒiÉ¨É*

**कालांशः - 10**

| आशयः/ धारणाः/ व्यवहाररुपाणि | पठनप्रवर्तनानि/ पठनतन्त्राणि | पठनाधिगमाः |
|---|---|---|
| योगासनानि आरोग्यसंरक्षणाय भवति।<br>प्रश्नावलीरचना।<br>सम्भाषणनैपुणी | उपन्यासं लिखन्ति।<br>मुद्रागीतानि रचयन्ति।<br>अभिमुखसम्भाषणं कुर्वन्ति। | आशयानुसारम् उपन्यासं लिखति।<br>प्रश्नावलीं निर्माति।<br>योगासनानां चित्राणि सञ्चिनोति। |

|É´ÉiÉxÉ¨É - 1

UÉjÉÉxÉ ºÉRÓPÉuªÉ EÒi´ÉÉ {ÉÉ`ÊªÉÉMÉºaÉ ºÉ¨ªÉEÒ ´ÉÉSÉxÉÉªÉ ÊxÉÌn¶ÉiÉ* ´ÉÉSÉxÉÉlÉ {Én{ÉnÉlÉYÉÉxÉ¨É +É´É¶ªÉEÒ ¦É´ÉÊiÉ* BiÉnlÉ {ÉnSUÉn:, {ÉnEÒÉ¶É o¹]´ÉÉ xÉiÉxÉ{ÉnÉxÉÉ¨É +lÉÉ´ÉMÉ¨É: SÉ +´É¶ªÉ EÒ®hÉÒªÉ:* +xÉxiÉ®Ò ªÉÉ´ÉSUÉCªÉ |É¶xÉÉxÉÉ ÊxÉ¨ÉÉhÉÉªÉ UÉjÉÉxÉ |É®ªÉiÉ* iÉiÉ: |É¶xÉÉkÉ®ÉEÒË±É ºÉ\SÉÉ±ÉªÉiÉ* +vªÉÉÊ{ÉEÒÉ ºÉRÓPÉ¦ªÉÉ =ÊSÉiÉ ºÉÉ½ÉaªÉ nnÉiÉ*

## आदर्शरूपाः केचन प्रश्नाः

1. दर्शनानि कानि?
2. योगदर्शनस्य उपज्ञाता कः?
3. पतञ्जलिमहर्षिणा रचितः ग्रन्थः कः?

4. योगशास्त्रे कति सूत्राणि सन्ति?

5. यमाः के?

6. नियमाः के?

7. बहिरङ्गयोगस्य अपरं नाम किम्?

8. पातञ्जलयोगसूत्रानुसारम् आसनस्य निर्वचनं किम्?

9. आसनानि कति विधानि?

10. वज्रासनानुष्ठानेन किं किं लभते?

11. आसनानाम् अन्ते अनुष्ठीयमानम् आसनम् किम्?

12. कशेरुकायाः दृढतार्थम् अनुष्ठीयमानम् आसनं किम्?

**|É´ÉiÉxÉ´É - 2 सम्भाषणलेखनम्, टिप्पणीलेखनम्।**

**उद्देश्यम् - सन्दर्भानुसारं सम्भाषणलेखनं टिप्पणीलेखनञ्च।**

**प्रक्रिया :-**

व्यायामस्य प्राधान्यमधिकृत्य टिप्पणीलेखनार्थं योगाचार्येण सह सम्भाषणं प्रथमं कार्यम्। योगाचार्येण सह सम्भाषणार्थं प्रश्नावलीनिर्माणाय छात्रान् प्रेरयतु। छात्राः सङ्घे स्थित्वा प्रश्नावलीं निर्माय सम्भाषणं लिखन्ति कक्ष्यायाम् अवतारयन्ति च। एवं सङ्घे चर्चां कृत्वा टिप्पणिं च कुर्वन्ति। अध्यापिका उचितं साहाय्यं ददाति।

## सम्भाषणम्

(सुमेष्, यूसफ्, सुषमा, जोय्, सितारा, सुहरा च दत्तसमाहरणार्थं योगाचार्यम् उपगच्छन्ति। तान् दृष्ट्वा)

आचार्यः - भो छात्राः कुतः आगच्छन्ति?

यूसफ् - आचार्य! वयं विद्यालयात् आगच्छामः।

आचार्यः - किमर्थम् अत्र आगच्छथ?

सुषमा - आचार्य! वयम् अष्टमकक्ष्यायां पठामः।अस्माकं पाठपुस्तके योगासनानि अधिकृत्य पाठोऽस्ति।तदधिकृत्य अधिकं ज्ञातुं वयम् इच्छामः।

आचार्यः - युष्माकं कीदृशः सन्देहः?

सुमेष् - व्यायामस्य प्राधान्यमधिकृत्य अस्माकं संशयः।

आचार्यः - आरोग्यपरिपालनाय व्यायामः उपकारकः।

सुहरा - आचार्य! आसनानि सर्वैः अनुष्ठातुं शक्यानि वा?

आचार्यः - आम्। यत्किमपि कर्तुं या शक्तिः अपेक्षते सा व्यायामात् लभते।

जोय् - व्यायामेन शारीरिकारोग्य एव लभते किम्?

आचार्यः - न न, शारीरिकारोग्यमिव मानसिकारोग्यमपि व्यायामेन लभते।

सितारा - आसनं नाम किम्?

आचार्यः - स्थिरसुखमासनम्।

सुमेष् - नित्यं व्यायाममाचरेत् इति किमर्थम् उच्यते?

आचार्यः - व्यायामेन शरीरपुष्टिः वर्धते। तथा एव बुद्धिः, तेजः, यशांसि च वर्धते। तेन नित्यं व्यायाममाचरेत्।

छात्राः - धन्यवादः। वयम् अगच्छाम।

## टिप्पणी

आरोग्यवता मनुष्येणैव स्वधर्मः सम्यक् निर्वोढुं शक्यते। मनसः शरीरस्य च स्वास्थ्याय उचितः भक्षणक्रमः उचितः व्यायामः उचिता दिनचर्या च पालनीयाः। व्यायामेन मनुष्यस्य बुद्धिः तेजः यशः बलञ्च वर्धते। व्यायामेन एकाग्रता, कर्मकुशलता, स्मृतिशक्तिः, ओजस्तेजः इत्यादयो गुणाः लभ्यन्ते। कस्यचन मानसिकावस्थाम् अनुसृत्यैव तस्य श्वासगतिः भविष्यति। क्रुद्धस्य एकस्य श्वासक्रमात् एतत् अवगन्तुं शक्यते। मनः शान्तं चेत् श्वासोच्छ्वासमपि शान्तं भविष्यति। यः निष्ठया प्रतिदिनं व्यायामं करोति सः समचित्तः भवति।

रक्तसम्मर्दः क्षिप्रकोपः भयम् उत्कण्ठा इत्यादीनां क्रमशः न्यूनीकरणार्थं व्यायामः उपयुज्यते। व्यायामेन शरीरपुष्टिः वर्धते। तथा एव बुद्धिः तेजः यशांसि च। अतः नित्यं व्यायाममाचरेत्। भोजनं कृत्वा होराचतुष्टयानन्तरम् एव व्यायामः करणीयः। तद्वत् व्यायामं कृत्वा होरानन्तरम् एव भोजनं कार्यम्। आधुनिकलोके प्रायशः मनुष्याणां सन्ततसहचारिणः भवन्ति आशङ्का उत्कण्ठा परिभ्रान्तिः मानसिकास्वस्थता च। एतेषां न्यूनीकरणार्थं नित्यं व्यायाममाचरेत्।

### |É´ÉiÉxÉ´É - 3 ¨ÉpÉMÉÒiÉ®SÉxÉÉ

**उद्देश्यम् - उचितपदान्युपयुज्य मुद्रागीतरचना।**

**प्रक्रिया :-**

सङ्घे स्थित्वा पाठभागं पठित्वा चर्चां च कृत्वा मुद्रागीतरचनायै छात्रान् प्रेरयतु। छात्राः रचितानि मुद्रागीतानि कक्ष्यायाम् अवतारयन्तु। अध्यापिका संशोध्य क्रोडीकृत्य फलके लिखतु। छात्राः स्वपुस्तके लिखन्तु।

1. कुरु योगविद्याम्
   भव पुष्टगात्रः।।

2. उन्मेष-बललाभाय
   करोतु धनुरासनम्।।

3. सर्वव्याधिविनाशाय
   कुरु योगासनं सदा।।

4. लावण्यं स्थैर्यमारोग्यं
   व्यायामादुपजायते।।

5. कुरु योगविद्याम्
   त्यज पृष्टशूलाम्।।

6. कायः कार्श्यं तथा कान्तिं
   योगाभ्यासेन साधयेत्।।

7. कुरु योगासनं नित्यं
   सर्वव्याधिविनाशनम्।।

8. युवको वा तथा वृद्धो व्याधितो दुर्बलोऽपि वा।
   अभ्यासात् सिद्धिमाप्नोति रोगशान्तिं मनस्सुखम्।।

**प्रवर्त्तनम् - 4 प्रभाषणलेखनम् अवतारणञ्च।**

**उद्देश्यम् - उचितया रीत्या आशयलेखनम्। प्रभाषणनैपुण्यसम्पादनम्।**

**प्रक्रिया - छात्राः सङ्घे स्थित्वा प्रभाषणलेखनाय चर्चां कुर्वन्तु।**

**चर्चासूचिकाः**

आरोग्यं नाम किम्?
भक्षणक्रमः कीदृशः भवति ?

व्यायामः केन कदा कीदृशः?
दिनचर्या कथम्?
योगाभ्यासस्य प्राधान्यानि कानि?

चर्चायाः अनन्तरं प्रभाषणलेखनाय छात्रान् प्रेरयतु, लेखनानन्तरं प्रतिसङ्घम् एकैकः अवतारयतु। ततः अध्यापिका क्रोडीकृत्य फलके लिखतु। टिप्पणिपुस्तके लिखन्तु छात्राः। अनन्तरं सर्वे छात्राः प्रभाषणं कक्ष्यायाम् अवतारयन्तु। अध्यापकः मूल्यनिर्णयं करोतु।

## प्रभाषणस्य मातृका

दोषसाम्यमरोगता। आरोग्यं प्रकृत्यनुकूलजीवितचर्यया एव लभ्यते। शरीरस्येव मनसः अपि आरोग्यम् आवश्यकम्। मनश्शरीरयोः स्वास्थ्यम् उत्तमजीवनस्य निदानं भवति। आरोग्यपरिपालनाय योगासनानि उपकारकाणि भवन्ति। कर्म कर्तुं या शक्तिः अपेक्षते सा व्यायामेन लभ्यते। व्यायामेन मनोनियन्त्रणम् एकाग्रता कर्मकुशलता स्मृतिशक्तिः ओजः तेजः च लभन्ते। "चिकित्सापेक्षया रोगनिरोधः एव वरम्" इत्यतः शरीरस्य आन्तरशुचित्वे योगाभ्यासाः प्राधान्यमर्हन्ति। 'प्रक्षालनाद्धि पङ्कस्य दूरादस्पर्शनं वरम्' इत्यस्ति प्रमाणम्। यः निष्ठया प्रतिदिनं योगासनानि करोति सः समचित्तः भवति। तस्य रक्तधमन्यः दृढाः भवन्ति। सर्वव्याधिविनाशनं योगाभ्यासेन सिध्यति। कायस्य कृशता कान्तिः च वर्धते। उदरस्थानाम् अवयवानाम् आरोग्यं श्वासकोशस्य सङ्कोचविकासक्षमतां च संवर्ध्य श्वसनप्रक्रियां सुखदां करोति।

एतादृशानि तत्वानि अवगम्य एव विश्वे सर्वत्र इदानीं योगशास्त्रस्य सर्वादरणीयता समुपलब्धा। इदानीम् अनेके विदेशीयाः अपि योगासनं ज्ञातुम् अभ्यसितुं च इच्छन्ति।

### अधिकविस्तरः

**यमाः** - अहिंसासत्यास्तेयब्रह्मचर्याऽपरिग्रहा यमाः। *(योगसूत्रम् -2-30)*

**नियमाः** - शौचसन्तोषतपःस्वाध्यायेश्वरप्रणिधानानि नियमाः। *(योगसूत्रम् -2-32)*

**आसनम्** - स्थिरसुखमासनम्। *(योगसूत्रम् -2-46)*

**प्राणायामः**- (तस्मिन् सति)श्वासप्रश्वासयोर्गतिविच्छेदः प्राणायामः। *(योगसूत्रम् - 2-49)*

**प्रत्याहारः**- स्वविषयासम्प्रयोगे चित्तस्वरूपानुकारः इवेन्द्रियाणां प्रत्याहारः। *(योगसूत्रम् - 2-54)*

**धारणा** - देशबन्धश्चित्तस्य धारणा।*(योगसूत्रम् 3-01)*

**ध्यानम्** - (तत्र) प्रत्यैकतानता ध्यानम्। *(योगसूत्रम् 3-02)*

**समाधिः** - तदेवार्थमात्रनिर्भासं स्वरूपशून्यमिव समाधिः । *(योगसूत्रम् 3-03)*

**आसनपञ्चकम्**

पद्मासनं स्वास्तिकाख्यं
मुक्तं भद्रासनं तथा।
वीरासनमिति प्रोक्तं
क्रमादासनपञ्चकम्।

यमाः - अहिंसा- मनसा वाचा कर्मणा च हिंसाराहित्यम्।

सत्यम् -प्रवृत्तौ वाक्षु च सत्याचरणम्।

अस्तेयम् - परद्रव्याणाम् अनपहरणशीलम्।

ब्रह्मचर्यम् -वीर्यधारणम्।

अपरिग्रहः -दानादीनाम् अस्वीकारः।

नियमाः -शौचम्- वाङ्मनःक्रियासु शुचित्वम्।

सन्तोषः -संतृप्तिः।

तपः -आत्मसंयमनेन इन्द्रियजयः।

स्वाध्यायः - वेदादीनामभ्यासः।

ईश्वरप्रणिधानम् -ईश्वरोपासनम्।

## അധികവിസ്തരം

യോഗദർശനത്തിന്റെ പ്രാമാണികഗ്രന്ഥമായ യോഗസൂത്രത്തിന്റെ കർത്താവ് പതഞ്ജലിമഹർഷിയാണ്. നാല് അധ്യായങ്ങളായി വിഭജിക്കപ്പെട്ട യോഗസൂത്രത്തിന്റെ അധ്യായങ്ങൾ, പാദം* എന്ന വിശേഷനാമത്തിൽ അറിയപ്പെടുന്നു. *സമാധിപാദം, സാധനാപാദം, വിഭൂതിപാദം, കൈവല്യപാദം* എന്നിവയാണ് ആ നാല് പാദങ്ങൾ. നാല് പാദങ്ങളിലും കൂടി ആകെ 196 സൂത്രങ്ങളാണുള്ളത്. സമാധിപാദത്തിൽ 51, സാധനാ പാദത്തിൽ 55, വിഭൂതിപാദത്തിൽ 56, കൈവല്യപാദത്തിൽ 34 എന്നിങ്ങനെയാണ് പാദങ്ങളുനസരിച്ചുള്ള സൂത്രങ്ങളുടെ എണ്ണം. എന്നാൽ പ്രാമാണികമായ പല ഗ്രന്ഥങ്ങളിലും ഈ സൂത്രസംഖ്യയിൽ വ്യത്യാസങ്ങൾ കാണപ്പെടുന്നുണ്ട്. യോഗസൂത്രത്തിന്റെ വ്യാഖ്യാനങ്ങളിൽ പ്രസിദ്ധമാണ് ഭോജരാജാവിന്റെ *രാജമാർത്താണ്ഡം* എന്ന വൃത്തിയും വ്യാസഭാഷ്യവും. ഇവയ്ക്ക് വാചസ്പതിമിശ്രവിരചിതമായ ടീകയും പ്രസിദ്ധമാണ്. യോഗസൂത്രത്തിന്റെ വ്യാസഭാഷ്യത്തിൽ മൂന്നാം പാദത്തിലെ 22-ാം സൂത്രമായ *ഏതേന ശബ്ദാദ്യന്തർധാനമുക്തം* എന്നസൂത്രം ഒഴിവാക്കപ്പെട്ടിരിക്കുന്നു. വ്യാസഭാഷ്യത്തിന്റെ ടീകയിൽ *അന്തർധാനമിതി സൂത്രമൂഹിതവ്യം* (പേജ് -146) എന്ന് ഈ സൂത്രത്തെ സൂചിപ്പിക്കുകമാത്രം ചെയ്തിരിക്കുന്നു. മലയാളവ്യാഖ്യാനങ്ങളിൽ വ്യാസഭാഷ്യത്തെ അനുസരിക്കുന്ന ബ്രഹ്മശ്രീ. വി.കെ.നാരായണഭട്ടതിരിയുടെ വേദരശ്മി എന്ന വ്യാഖ്യാനത്തിൽ ഈ സൂത്രം പരാമർശിക്കുന്നുണ്ടെങ്കിലും സൂത്രത്തെ എണ്ണത്തിൽ കൂട്ടിയിട്ടില്ല. (പേജ് -62) ശ്രീരാമകൃഷ്ണമഠം മൈലാപ്പൂർ പ്രസിദ്ധീകരിച്ച സ്വാമി പ്രഭവാനന്ദയുടെ ഇംഗ്ലീഷ്വ്യാഖ്യാനത്തിലും തൃശൂർ ശ്രീരാമകൃഷ്ണമഠം പ്രസിദ്ധീകരിച്ച വിവേകാനന്ദസ്വാമികളുടെ *രാജയോഗ*ത്തിലും ഈ സൂത്രം സ്വീകരിച്ച് വ്യാഖ്യാനിച്ചിട്ടുണ്ട്.

വ്യാസഭാഷ്യത്തിൽ നാലാംപാദത്തിൽ 16-ാമത്തെ സൂത്രമായി പഠിച്ചിരിക്കുന്ന, വിജ്ഞാനവാദത്തെ ഖണ്ഡിക്കുന്ന *ന ചൈകചിത്തതന്ത്രം വസ്തു തദപ്രമാണകം തദാ കിം സ്യാത്* എന്ന സൂത്രം വിവേകാനന്ദസ്വാമികളുടെ യോഗസൂത്രത്തിൽ വ്യാഖ്യാനിച്ചിട്ടുണ്ടെങ്കിലും എണ്ണത്തിൽപെടുത്തിയിട്ടില്ല. സി.വി.വാസുദേവഭട്ടതിരിയുടെ വ്യാഖ്യാനത്തിലും*(ഭാരതീയദർശനങ്ങൾ)* ഈ സൂത്രത്തെ വ്യാഖ്യാനിക്കുന്നുണ്ടെങ്കിലും സൂത്രക്രമത്തിൽ പരിഗണിക്കപ്പെട്ടിട്ടില്ല. ശ്രീരാമകൃഷ്ണാശ്രമം പ്രസിദ്ധീകരിച്ച ഇംഗ്ലീഷ് വ്യാഖ്യാനത്തിൽ 15 എ എന്ന് ഉപസൂത്രമായും ഈ സൂത്രത്തെ പരിഗണിച്ചിട്ടുണ്ട്. ഇപ്രകാരം മുഴുവൻ സൂത്രങ്ങളും (196) ഉദ്ധരിച്ച് വ്യാഖ്യാനിക്കപ്പെട്ടിരിക്കുന്ന ഗ്രന്ഥമാണ് സ്വാമി ജ്ഞാനേശ്വരഭാരതിയുടെ വ്യാഖ്യാനം.

* * * * * * * *

യമം, നിയമം, ആസനം, പ്രാണായാമം എന്ന് നാല് ബഹിരംഗങ്ങളും പ്രത്യാഹാരം, ധാരണം, ധ്യാനം, സമാധി എന്ന് നാല് അന്തരംഗങ്ങളും യോഗശാസ്ത്രത്തിനുണ്ട് എന്നും, യമാദികൾ നാലും പ്രധാനമായി ഹഠയോഗപരവും പ്രത്യാഹാരാദികൾ നാലും പ്രധാനമായി രാജയോഗപരവും ആണെന്നും സ്വാത്മാരാമവിരചിതമായ *ഹഠയോഗപ്രദീപിക*യ്ക്ക് പ്രസിദ്ധയോഗാചാര്യനായ ശ്രീ.വെൺകുളം പരമേശ്വരൻ എഴുതിയ വ്യാഖ്യാനത്തിൽ പ്രസ്താവിച്ചിട്ടുണ്ട് (പേജ്- 5,13). യമാദികളായ അഞ്ചെണ്ണം ബഹിരംഗമെന്നും ശേഷം അന്തരംഗമെന്നും സർവ്വദർശനസംഗ്രഹാദികളായ മറ്റുഗ്രന്ഥങ്ങളിലും കാണുന്നുണ്ട്..

*　　*　　*

.

सर्ग-वर्ग-परिच्छेद-उद्योत-अध्याय-संग्रहाः

उच्छ्वास-परिवर्तश्च-पटल-काण्डमेव च।

स्थानं-प्रकरणश्चैव-पर्व-उल्लास-आह्निकम्

पाद-स्कन्ध-मयूखश्च ग्रन्थसन्धिं प्रचक्षते।- इत्यनेन वचनेन अध्यायस्य विशेषनाम अस्ति पादः इति।।

विशेषेणावगन्तव्यम्-

यमनियमौ सदाचारपरौ स्तः। छात्राणां मनसि धार्मिकमूल्यानि अधिकृत्य किञ्चिदपि ज्ञानमुत्पादयितुं तयोः सामान्यपरिचायनेन शक्यन्ते। तदा योगासनानां परिचायनम् आरोग्यपरिपालनार्थञ्च उपकुर्वति। पातञ्जलयोगसूत्रे आसनानां विभिन्नानाम् अभ्यसनक्रमः द्रष्टुं न शक्यते इत्यनेन हठयोगप्रदीपिकातः घेरण्डसंहितातः आसनानुष्ठानक्रमं स्वीकरोति पाठभागेऽस्मिन्।।

# चतुर्थः पाठः
# कृषिः सर्वार्थसाधिका

## आमुखम्

आधुनिके काले रासोर्वरकाणि उपयुज्य कृषिं कृत्वा लब्धानि शाकादीनि मानवानाम् आरोग्यस्य हानये पारिस्थितिकप्रश्नानां च कारणत्वेन भविष्यन्ति। मनुष्यस्य आरोग्याय रोगप्रतिरोधशक्त्यर्थं च 300 धान्यपरिमितं (एकं धान्यं चतुस्तिलपरिमाणम्- तदेकं ग्राम्- इति नवीनाः) शाका आवश्यकी इति भारतीय आरोग्यशास्ता केन्द्रस्य निर्देशः। किन्तु केरलीयजनानां शाकोपयोगः न्यूनातिन्यूनं भवति। आधुनिके लोके केरलीयाः प्रायः कृषिकर्मसु विमुखाः दृश्यन्ते। ये जनाः कृषिकर्मणि व्यापृताः ते केवलं वाणिज्यार्थं कृषिकर्म कुर्वन्ति। अत एव अधिकलाभार्थं रासोर्वरकाणि रासकीटनाशकाश्च उपयुज्यन्ते। एतेषाम् उपधिकोपयोगः आरोग्यस्य हानये कल्पते। आपणे लब्धाः कार्षिकविभवाः दैनन्दिनम् उपयुज्यन्ते तर्हि नूनं जना; रोगग्रस्ता; भविष्यन्ति। अत्रैव जैवकृषेः प्राधान्यम्। जैवकृषिरीतिमनुसृत्य अस्माकं गृहाङ्गणात् काश्चन शाका लभते तर्हि आरोग्यलाभः आयुषः लाभः धनलाभः मानसिकोल्लासः च सिद्धयन्ति। संस्कृते प्रसिद्धेषु विविधेषु वृक्षायुर्वेदग्रन्थेषु अपि जैवकृषिरीतिमधिकृत्य परामर्शाः सन्ति।।

**आशयः** - जैवकृषिरीतिं प्रति आभिमुख्यम्।

**नैपुण्यम्** - सम्भाषण नैपुणी।

**कालांश** - 14

**मूल्यनिर्णयः**

सम्भाषणलेखनम् ।
लघुटिप्पणिलेखनम् ।
ह्रस्वोपन्यासलेखनम्

| आशयः/ धारणाः/ व्यवहाररुपाणि | पठनप्रवर्तनानि/ पठनतन्त्राणि | पठनाधिगमाः |
|---|---|---|
| पाठभागस्य वाचनम्<br>नूतनपदानां परिचायनम्।<br>समानाशययुक्त।<br>नां लघूपन्यास लेखनम्।<br>व्याकरणज्ञानम्। | सङ्घशः एकैकशः च सम्भाषणं वाचयति।<br>संश्लिष्टपदचयनम् ।<br>सन्धिच्छेदलेखनम् ।<br>नूतनपदचयनम्।<br>अर्थलेखनम्।<br>लघूपन्यासलेखनम्।<br>कर्तरि-कर्मणि प्रयोगौ विविच्य लेखनम्। | स्वाभाविकसन्दर्भेषु सयुक्तिकं सम्भाषणं करोति।<br>कर्तरि कर्मणिप्रयोगौ विविच्य लिखति।<br>जैवकृषिमधिकृत्य ह्रस्वोपन्यासं लिखति अवतारयति। |

**प्रवर्तनम् 1 - सम्भाषणं करोति, टिप्पणिं लिखति।**

**उद्देश्यम् - कृषिं प्रति आभिमुख्यम्, स्वाभाविकसन्दर्भेषु सम्भाषणं करोति।**

**प्रक्रिया : -**

कृषिकार्यलायाधिकारिणा सह सम्भाषणं कृत्वा लघुटिप्पणीलेखनाय पाठ्यांशस्य वाचनम् अनिवार्यं भवति। पाठ्यांशस्य आशयग्रहणाय पद-पदार्थज्ञानम् आवश्यकं भवति। छात्रा; सङ्घे उपविश्य संश्लिष्ट पदानां पदच्छेदं नूतनपदानाम् अर्थं च शब्दकोशस्य साहाय्योन टिप्पणिपुस्तके लिखन्तु। कक्ष्यायाम् अवतारयन्तु। अनन्तरं कृषिकार्यालयाधिकारिणा सह सम्भाषणाय प्रश्नावलीनिर्माणं कुर्वन्तु। अनन्तरं सम्भाषणं लिखित्वा अवतारयन्तु।

**प्रश्नावली -**

1. कृषिस्थलं कीदृशं भवेत्?
2. कानि कानि शाकानि रोपणीयानि?
3. बीजानि कस्मात् उपलभ्यन्ते?

4. कीदृशानि उर्वरकाणि शाकानां परिपोषणाय उपयुक्तानि?
5. कीदृशैः कीटाणुभिः सस्यानि आक्रम्यन्ते?
6. कीटाणूनां प्रतिरोधमार्गाः के?
7. सस्यसंरक्षणं कथं भवति?
8. जैवकृषिरीतिः सर्वैः कर्तुं शक्यते वा?

## टिप्पणी

शाकाकृषिः कर्तुं यथेष्टं जलं सूर्यप्रकाशं च आवश्यकम्। भेण्डः, कारवेल्लः, मरीचम्, कर्कटी, वृन्दाकं, सूरणं, रक्तफलं, पुष्पशाकं, कदलीफलम् इत्यादीनि शाकानि गृहपरिस्सरे कर्तुं शक्यन्ते। बीजानि कृषिभवनात् सस्योद्यानात् वा लभन्ते। गोमयं, पिण्याकं, कुक्कुटानाम् अजानां च पुरीषं, हरितपर्णानि, जैवोर्वरकाणि च उर्वरकत्वेन उपयुज्यन्ते। नैकाः शलभाः चित्रकीटाः इत्यादयः कीटाणवः शाकादीन् आक्रम्यन्ते। गोमूत्रम्, निम्बपिण्याकं, जैवकीटनाशकान् च कीटाणूनां नाशकाय उपयुज्यन्ते। कृषिस्थलं सस्यपरिवृतिं, पुष्पसस्यानां परिवृतिं वा निर्मीय संरक्ष्यते। जैवकृषिः सर्वैः कर्तुं शक्यते। जैवकृषिरीतिः अनुसृत्य उपलब्धानि शाकादीनि आरोग्यस्य हिताय भवति।

**प्रवर्तनम् 2 - टिप्पणीलेखनम्।**

**उद्देश्यम् - जैवकृषिं प्रति आभिमुख्यम्।**

**प्रक्रिया :-**

जैवकृषिरीतिमधिकृत्य लघुटिप्पणीलेखनार्थं दत्तसमाहरणम् आवश्यकम्। तदर्थं कृषिकार्यालयात् लब्धाः लघुलेखाः कक्ष्यायां छात्रसङ्घेभ्यो वितरतु। पाठपुस्तकस्थं सम्भाषणपाठं लघुलेखां च पठित्वा टिप्पणीलेखनाय प्रेरयतु। अध्यापिका उचितं साहाय्यं ददातु। छात्रैः लिखितानि कक्ष्यायाम् अवतारयन्तु। क्रोडीकृत्य फलके लिखतु।

## टिप्पणी

जैवकृषिरीतिः मनुष्याणाम् आरोग्याय भवति। अस्माकं गृहस्य समीपे भूमिः नास्ति चेत् गृहस्य उपरितलभागे शाककृषिः कर्तुं शक्यते। कृषिक्षेत्रं यथाविधि सज्जीकृत्य बीजानि वपति। जैवकृषिरीत्या भूमेः उर्वरता आर्द्रता च परिपाल्यते।

प्रकृत्या लभ्यमानानि गोमयादीनि ऊर्वरकाणि, हरितपर्णानि, पिण्याकं, भूनागप्रभृतीनि च यथायोग्यम् उपयुज्य कृषिकर्म कुर्वन्ति चेत् शाकादीनि कदापि मनुष्याणां हानये न भवन्ति। सूक्ष्मप्राणिनाम् इतरेतरसंयोगेन कीटाः नश्यन्ते इत्यतः कीटनाशकानाम् उपयोगः नावश्यकः। अतः सर्वैरपि जैवकृषिरीतिः अनुकरणीया।

**प्रवर्तनम् 3 - पट्टिकाकरणम्**

**उद्देश्यम् - पदविवेचनसामर्थ्यम्।**

**प्रक्रिया :-**

अनुबन्धे प्रदत्तां पट्टिकां पठित्वा शाकानां पुष्पाणां फलानां च विविच्य पट्टिकाकरणाय प्रेरयतु। (व्यक्तिगतप्रवर्त्तनमिदम्) लेखनानन्तरं द्वित्राः छात्राः कक्ष्यायाम् अवतारयन्तु। अध्यापिका फलके लिखतु। छात्रा; टिप्पणिपुस्तके योजयन्तु।

| **शाका** | **पुष्पम्** | **फलम्** |
|---|---|---|
| अलाबू | सेवन्ति | द्राक्षाफलम् |
| सूरणम् | पाटलम् | दलीफलम् |
| मरिचम् | जपाकुसुमम् | सेवा |
| आलुकम् | मल्लिका | दाडिमम् |
| गोस्तनी | कर्णिकारम् | मधुकर्कटी |
| पटोलः | पारन्ती | अनानसम् |
| वृन्दाकम् | कमलम् | पनसम् |
| रक्तफलम् | अशोकम् | आम्रम् |

**प्रवर्तनम् 4 - लघुलेखनिर्माणम्।**

**उद्देश्यम् - भाषाप्रयोगः।**

**प्रक्रिया :-**

जैवकृषेः प्रचारार्थं लघुलेखा-निर्माणाय छात्रान् सङ्घान् करोतु। प्रादेशिकभाषायां लभ्यमानानि कृषिसम्बन्धीनि लेखनानि सङ्घेभ्यो वितरतु। ततः लघुलेखनिर्माणाय प्रेरयतु। कक्ष्यायाम् अवतारयन्तु छात्राः। अध्यापिका क्रोडीकृत्य फलके लिखतु।

## त्यजतु रासोर्वरकम्, आर्जय आरोग्यम्।

बहुमान्या ग्रामवासिनः

आगस्ट्मासस्य एकविंशतितमे दिने कृषिभवनस्य समीपस्थे विद्यालयाङ्कणे जैवकृषिरीतेः प्राधान्यम् अधिकृत्य त्रिदिनात्मिका सङ्गोष्ठी प्रचलिष्यति। केरलराज्यस्य कार्षिकसर्वकलाशालायाः उन्नताधिकारिणः संगोष्ठ्यां भागं भजन्ते। अस्मिन् सुवर्णावसरे सर्वेषां जनानां सन्निध्यं सादरं प्रार्थये।

सविनयम्

मलप्पुरम् — कार्षिककार्यवाहकः।
3-8-2015 — कृषिभवनम्।

**प्रवर्तनम् 5 - कर्तरि-कर्मणिप्रयोगानां विविच्य लेखनम्।**

**(छात्राणां स्तरानुसारं केवलपरिचायनाय प्रवर्तनमिदम्)**

**उद्देश्यम्** - **कर्तरिकर्मणि प्रयोगानां विविच्य ज्ञानम्**

**प्रक्रिया** :-

कर्तरि कर्मणि वाक्यानि विविच्य लेखनार्थं छात्राणां प्रयोगवैशिष्ट्यज्ञानम् आवश्यकं भवति तदर्थम् अध्यापिका चार्ट्पत्रे कानिचन वाक्यानि अधोदत्तवत् विलिख्य प्रदर्शयतु-

| | अ | आ |
|---|---|---|
| 1. | दिनेशः जनकं प्रणमति। | दिनेशेन जनकः प्रणम्यते। |
| 2. | छात्राः प्रार्थनां कुर्वन्ति। | छात्रैः प्रार्थना क्रियते। |
| 3. | अम्बा ओदनं पचति। | अम्बया ओदनं पच्यते। |
| 4. | महिलाः जलम् आनयन्ति। | महिलाभिः जलम् आनीयते। |
| 5. | अहं फलानि खादामि | मया फलानि खाद्यन्ते। |

ततः छात्रान् सङ्घद्वयं कृत्वा प्रथमसङ्घम् 'अ' विभागात् एकैकस्य वाक्यस्य वाचनाय निर्दिशतु। ततः द्वितीयसङ्घम् 'आ' विभागात् एकैकस्य वाक्यस्य वाचनाय निर्दिशतु। ततः द्वयोः विभागयोः वाक्यभेदः का इति किमिति चिन्तनाय प्रेरयतु। छात्रान् द्रढीकर्तुं अध्यापिका प्रयोगः कीदृशः इति विशदयतु।

कर्तरिप्रयोगः, कर्मणिप्रयोग;, भावेप्रयोगः इति प्रयोगाः त्रिधा भवन्ति। कर्तरि प्राधान्ये वाक्यस्य प्रयोगः कर्तरिप्रयोग;, कर्मणि प्राधान्ये वाक्यस्य प्रयोगः कर्मणिप्रयोगः, अकर्मकधातूनां प्रयोगे कर्माभावात् भावेप्रयोगश्च।

कर्तरिप्रयोगे कर्ता प्रथमाविभक्तौ, कर्म द्वितीयाविभक्तौ, क्रियापदं कर्तृपदानुरूपं च भवति। अर्थात् कर्तृपदं यादृशपुरुष-वचनयुक्तं भवति, क्रियापि तादृशपुरुष-वचनयुक्ता भवति। यथा - बालः पाठं पठति।कर्मणिप्रयोगे कर्ता तृतीयाविभक्तौ कर्म प्रथमाविभक्तौ क्रिया च कर्मपदानुरूपा च भवति। अर्थात् कर्मपदे यः पुरुषः यत् वचनं च भवति क्रियायामपि तदेव पुरुषः वचनं च भवति। धातोः कर्मणि रूपाणि उपयुज्यन्ते। कर्मणिप्रयोगेषु धातोः आत्मनेपदरूपाणि भवन्ति एव।।

यथा - बालेन पाठः पाठ्यते।

भावेप्रयोगे तु कर्ता तृतीयाविभक्तौ युष्मदस्मदोः समानाधिकरणाभावात् अत्र पुरुषवचनभेदाः न भवन्ति। केवलं प्रथमपुरुषैकवचनरूपम्। त्वया भूयते। मया भूयते।अन्यैः भूयते।

यथा - सः कृषकः भवति। तेन कृषकेण भूयते।

वाक्येषु क्रियापदानि प्रथमाविभक्त्यनुसारमेव भवन्ति।

कर्मणिप्रयोगे सार्वधातुकलकारैः (लट्, लङ् लोट्, विधिलिङ्) सह 'यक्' प्रत्ययं योजयित्वा क्रियापदानि निष्पाद्यन्ते।

यथा -

पठति - पठ् + यक् + ते - पठ्यते (यक् -इत्यस्य क् शब्दस्य इत् संज्ञया लोपः)

लिखति - लिख् + यक् + ते - लिख्यते

अनन्तरं पाठपुस्तके दत्तानि वाक्यानि कर्तरि कर्मणि च विविच्य लेखनाय प्रेरयतु। लिखितानि कक्ष्यायाम् अवतारयन्तु। अध्यापिका अवश्यं साहाय्यमपि ददातु।

गोपालेन गौः  रक्ष्यते - कर्मणि प्रयोगः।

अहं त्वां वन्दे - कर्तरि प्रयोगः।

गोपालः गां रक्षति - कर्तरि प्रयोगः।

मया त्वं वन्द्यसे - कर्मणि प्रयोगः।

# एककम् -2

# पुरावृत्तम्

## पञ्चमः पाठः

## गीतासुधामाधुरी

### आमुखम्

अस्मिन् संसारे शान्तिरेव सर्वैरन्विष्यते। अशान्तचित्तस्य यत्रकुत्रापि सुखं नास्ति। अशान्तमनस्काः महात्मनां तत्वोपदेशान्यनुगच्छन्ति। एतादृशानामुपदेशानामाकरं भवति महाभारतम्। विदुरनीतिः, भगवद्गीता, शन्तिपर्वम्, अनुगीता इत्यादयः तत्वोपदेशपराः भागाः महाभारतादुपलभ्यन्ते। तेषु भगवद्गीतायाः समुद्धृताः शान्तेः महत्वप्रतिपादकं श्लोकचतुष्टयम् अत्र दत्तम्।

**उद्देश्यम् - गीताश्लोकानां पठनेन तेष्वन्तर्भुतानां तत्वोपदेशानां स्वांशीकरणम्।**

**कालांशः - 15**

| **आशयः/ धारणाः/ व्यवहाररुपाणि** | **पठनप्रवर्तनानि/ पठनतन्त्राणि** | **पठनाधिगमाः** |
|---|---|---|
| श्लोकस्य गद्यक्रमेण लेखनम्। गीताश्लोकानां चयनम्। वृत्तावबोधः। गीताश्लोकानां समीचीनया रीत्या आलपनम्/ संश्लिष्टपदानां पदच्छेदः। | श्लोकानामालपनम्। | गीतासूक्तानि आशयानुसारं समाहरति। श्लोकानालपति। प्रकरणानुसारं गीताश्लोकान् लिखति। |

## आशयः/धारणा/व्यवहाररूपाणि

श्लोकस्य गद्यक्रमेण लेखनम्। गीताश्लोकानां चयनम्। वृत्तावबोधः। गीताश्लोकानां समीचीनया रीत्या आलपनम्/संश्लिष्टपदानां पदच्छेदः।

**पठनाधिगमः** - गीतासूक्तानि आशयानुसारं समाहरति। श्लोकानालपति। प्रकरणानुसारं गीताश्लोकान् लिखति।

**पठनप्रवर्तनम्** -1 श्लोकानामालपनम्।

**उद्देश्यम्**- माधुर्येण अक्षरव्यक्ततया च श्लोकालपननैपुण्यम्।

**प्रक्रिया** -

अध्यापकः पठितपूर्वाणां गीताश्लोकानामालपनाय छात्रान् निर्दिशति। छात्राः वैयक्तिकरूपेण तैः पठितानां गीताश्लोकानाम् आलपनं कुर्वन्ति। आलपितानां श्लोकानाम् अर्थकथनाय च प्रेरयति। ये छात्राः सम्यक् कथितवन्तः तान् अभिनन्दतु। अनन्तरं छात्रान् पाठभागस्य गीताश्लोकानाम् आलपनाय निर्दिशति। उचितया रीत्या छात्राः आलपनं कुर्वन्तु। यत्र आलपनावसरे क्लेशमनुभवन्ति तत्र अनुवाचनेन अध्यापकः साहाय्यं च ददाति। तदनु अध्यापकः मूल्यनिर्णयं च करोति।

## मूल्यनिर्णयसूचिकाः

अक्षरशुद्धिः

तालक्रमः

आशयावबोधः।

**पठनप्रवर्तनम् -2 - नूतनपदानां चयनम्।**

**उद्देश्यम् - नवीनपदानां परिचयः अर्थावबोधश्च।**

**प्रक्रिया :-**

छात्राः द्विवारं पाठं सम्यक् पठन्ति। नूतनपदानि टिप्पणिपुस्तके उद्धृत्य लिखन्ति च। अथ पाठपुस्तकस्थम् अन्यमपि शब्दकोशं निरीक्ष्य तेषां पदानाम् अर्थान् ज्ञात्वा लिखन्ति। यथावसरं तत्रापि अध्यापकेन साहाय्यं दातव्यम्। (इदं वैयक्तिकप्रवर्तनम्)

**मूल्यनिर्णयसूचिकाः**

उचितपदानां चयनम्

अर्थावबोधः

***(एका मातृका)***

| | | | |
|---|---|---|---|
| हानिः | - नाशम् | निस्पृहः | - निरासक्तः |
| आशु | - शीघ्रम् | निर्ममः | - ममतारहितः |
| प्रज्ञा | - बुद्धिः | अधिगच्छति | - प्राप्नोति |

**प्रवर्तनम् 3 - संश्लिष्टपदानां पदच्छेदः।**

**उद्देश्यम् - संश्लिष्टपदपरिचयः।**

**प्रक्रिया :-**

अध्यापकः प्रतिसङ्घं श्लोकान् ददाति। संश्लिष्टपदानि छात्राः चिन्वन्ति। तानि टिप्पणिपुस्तके लिखित्वा तेषां पदच्छेदलेखनाय प्रेरयति। अध्यापकः तत्रस्थानां विशेषं च पृच्छति। छात्राः पदच्छेदं कृत्वा तत्रस्थं विशेषञ्च वदन्ति।

यथा - **चायुक्तस्य = च +अयुक्तस्य।**

अत्र अ + अ = आ इति सवर्णदीर्घः भवति इति छात्राः अवगम्य वदन्ति। एवम् अन्यत्रापि। यत्र कथनाय क्लिष्टताम् अनुभवन्ति तत्र साहाय्यं करोतु।

सवर्णदीर्घस्य मातृका -

अ + अ = आ , तत्र +अपि = तत्रापि / तथा + अपि = तथापि

इ + इ = ई , इति +इव= इतीव / सती + इव = सतीव

उ + उ = ऊ, मधु + उदकम् = मधूदकम्

**मूल्यनिर्णयसूचिकाः**

उचितपदचयनम् ।

उचितः पदच्छेदः।

अर्थावबोधः।

**प्रवर्तनम् 4 - अन्वयलेखनम् ।**

**उद्देश्यम् - श्लोकानां गद्यक्रमेण परिवर्त्य लेखनाय नैपुणीसम्पादनम्।**

**प्रक्रिया :-**

अध्यापकः छात्रान् सङ्घान् कृत्वा एकैकस्मै सङ्घाय श्लोकमेकं ददाति। छात्राः सङ्घेषु चर्चां कृत्वा आशयानुसारं श्लोकस्थानि पदानि पुनःक्रमीकृत्य गद्यरूपेण लिखन्ति। अनन्तरं पाठपुस्तकस्थेन अन्वयेन सह तुलनं कृत्वा परिष्कुर्वन्ति। एवं छात्राः एव मूल्यनिर्णयं कुर्वन्ति। अध्यापकः अवश्यं साहाय्यमपि ददाति।

## मूल्यनिर्णयसूचिकाः

उचिता वाक्यघटना।

आशयावबोधः।

वाक्यस्य पूर्णता।

**प्रवर्तनम् 5 - गीतासूक्तानां चयनम् ।**

**उद्देश्यम् - प्रकरणानुसारं गीताश्लोकानामुपयोगाः।**

**प्रक्रिया :-**

अध्यापकः यावच्छक्यं गीताश्लोकानां समाहरणाय छात्रान् निर्दिशति। छात्राः श्लोकसमाहरणार्थं यतन्ताम्। अथ आशयानुसारं तथा अक्षरमालक्रमेण च क्रोडीकुर्वन्ति। क्रोडीकृतान् श्लोकान् संयोज्य सम्पुटं रचयन्ति। अवतारयन्ति च।

## मूल्यनिर्णयसूचिकाः

आशयसम्पुष्टानां श्लोकानाम् समाहरणम्।

आशयानुसारं क्रोडीकरणम् ।

अवतारणम्।

**अनुबन्धप्रवर्तनम्**

**ध्येयवाक्येषु स्वीकृतानां गीतासूक्तानां परिचायनम्।**

अनेकासां संस्थानाम् औद्योगिकचिह्नेषु गीतायाः उद्धृताः श्लोकांशाः ध्येयवाक्यत्वेन द्रष्टुं शक्यन्ते। ते यस्याः संस्थायाः इति विविच्य ज्ञानाय छात्रान् निर्दिशति। तदर्थम् अध्यापकः ध्येयवाक्यानि संस्थानाम् नामानि मिश्रीकृत्य चार्ट्पत्रे लिखित्वा प्रदर्शयति। छात्राः तानि यथोचितं योजयन्ति।

| **ध्येयवाक्यम्** | **संस्था** |
|---|---|
| योगक्षेमं वहाम्यहं | भारतीय जीवन् बीमा निगमः(एल्.ऐ.सी ओफ् इन्ड्या) |
| नभस्पृशं दीप्तम् | भारतीयवायुसेना |
| जवहरलाल् नेहरू टेक्निक्कल् सर्वकलाशाला | योगः कर्मसु कौशलम् |
| श्रद्धावान् लभते ज्ञानम् | मैसूर् सर्वकलाशाला |

**प्रवर्तनम् - 6**

**उद्देश्यम् - गीतासूक्तानां समाहरणम्।**

**प्रक्रिया**

अध्यापकः कतिपयानां सूक्तानां समाहरणाय छात्रान् निर्दिशति। छात्राः तानि सम्पाद्य कक्ष्यायाम् अवतारयन्ति। अध्यापकः क्रोडीकृत्य आशयं च विशदय्य फलके लिखति। छात्राः स्वस्य पुस्तके तानि लिखन्तु। यथा -

1 समत्वं योग उच्यते।

2 कर्मण्येवाधिकारस्ते।

3 उद्धरेदात्मनात्मानम्।

4 पण्डिताः समदर्शिनः।

* *

# षष्ठः पाठः
# त्वमेव जननी भव।

## आमुखम्

संस्कृतरूपककारेषु सुप्रसिद्धो भवति महाकविः भासः। कालीदासादीनाम् अनन्तरकालीनानां समादरस्य पात्रीभूतोऽयं महाकविः त्रयोदशरूपकाणि विरचितवान्। तानि रूपकाणि भासनाटकचक्रम् इति प्रथितानि भवन्ति। अनितरसाधारणया प्रतिभया सम्पन्नोऽयं महाभागः रूपकसाहित्यस्य विभिन्नासु मेखलासु स्वकीयं योगदानं कृतवानासीत्। कालिदासस्य मालविकाग्निमित्रे, राजशेखरस्य सूक्तिमुक्तावल्याम्, बाणभट्टस्य हर्षचरिते च भासस्य महत्वमधिकृत्य प्रस्तावनाः द्रष्टुं शक्यन्ते। महाकविः जयदेवस्तु महाकविं भासं कविताकामिन्याः हासः इति प्रस्तौति।

भासनाटकचक्रेषु अन्यतमं रूपकमस्ति ऊरुभङ्गम्। महाभारताद् इतिवृत्तं स्वीकृत्य महाकविर्भासः स्वकीयया प्रतिभया परिष्कृत्य एकाङ्करूपकमिदं व्यरचयत्। अत्र हि कौरवज्येष्ठस्य दुर्योधनस्य ऊरुभङ्गपर्यन्ता कथा उपवर्णितास्ति। संस्कृतसाहित्ये विद्यमानेषु रूपकेषु इदमेव प्रथमं दुःखान्तनाटकमिति अभिप्रैति विद्वज्जनः।

**उद्देश्यम्** - संस्कृतनाटकानां परिचायने अवतारणे च तात्पर्योत्पादनम्।

**कालांशः** - १५

**आधारग्रन्थसूची** - भासनाटकचक्रम्, संस्कृतसाहित्यचरित्रम्।

| आशयः/ धारणाः/ व्यवहाररुपाणि | पठनप्रवर्तनानि/ पठनतन्त्राणि | पठनाधिगमाः |
|---|---|---|
| रूपकसाहित्यानां परिचयं लभते। कथापात्राणां स्वभाववैचित्र्यं जानाति। सम्बुद्धिरूपाणां परिचायनम्। पितृपुत्रबन्धस्य महत्वं प्रत्यभिजानाति। सम्भाषणसामर्थ्यं लभते। कथापात्राणां भागं स्वीकृत्य रूपकावतारणे तात्पर्यम्। प्रश्नवाचकशब्दानां परिचायनम्। | सम्बुद्धिपदानां चित्वा लेखनम्। कथापात्राणां वैशिष्ट्यनिरूपणम्। रूपकस्यावतारणम्। सम्भाषणस्य गद्यरूपेण लेखनम्। प्रश्नोत्तरक्रीडा। | सम्बोधनप्रथमाविभक्तिरूपाणि लिखन्ति। प्रश्नवाचकशब्दानुपयुज्य प्रश्नोत्तराणि लिखन्ति। कथापात्राणां भागं स्वीकृत्य रूपकावतारणं कुर्वन्ति। ललितया रीत्या संस्कृतेन भाषणं कुर्वन्ति। |

**प्रवर्तनम् 1 - सम्बोधनप्रथमाविभक्तिरूपाणां चित्वा लेखनम्।**

**उद्देश्यम् - विभक्तिरूपाणां सामान्यपरिचायनम्।**

**प्रक्रिया - वैयक्तिकम्।**

अध्यापकः कक्ष्यां प्रविश्य अभिवादन-प्रत्यभिवादनानन्तरं रमेश किं करोषि? सीते गृहपाठं कृतं वा? इत्येवं छात्रान् आहूय कुशलं पृच्छति। छात्राः लघुवाक्येन उत्तरं प्रददति च। अनन्तरं नामरूपस्य सम्बोधनरूपस्य च विशेषता का? इति पृच्छति। तयोः सादृश्यमन्तरं चाधिकृत्य चर्चां च कुर्वन्तु। नामतः संम्बोधनरूपस्य ईषद्भेदोऽस्तीति ते निर्णयं कुर्वन्ति। अथ **त्वमेव जननी भव** - इति पाठभागात् सम्बोधनरूपाणि चित्वा लेखनाय छात्रान् प्रेरयति। छात्राः तानि विविच्य टिप्पणीपुस्तके लिखन्ति च।

**पाठस्थितानि सम्बोधनरूपाणि ।**

पुत्र, पुत्रक, गान्धारि, जात, सुयोधन, दुर्योधन,

पुत्रज्येष्ठ, तात, पौत्र, दुर्जय, महाराज, आर्याः, मातः।

**मूल्यनिर्णयसूचिका:**

=ÊSÉiÉÊ´É¦ÉÊHò°ü{ÉÉhÉÉ º´ÉÒEò®hÉ¨É*

{ÉhÉiÉªÉÉ ±ÉJÉxÉ¨É*

**|É´ÉiÉxÉ¨É 2 - |É¶xÉ´ÉÉSÉEò¶É¤nÉxÉ{ÉªÉVªÉ |É¶xÉÉkÉ®±ÉJÉxÉ¨É***

**=q¶ªÉ¨É - |É¶xÉ´ÉÉSÉEò¶É¤nÉxÉÉ {ÉÊ®SÉÉªÉxÉ¨É***

**|ÉÊGòªÉÉ - ´ÉªÉÊHòEò¨É***

{ÉÉ`ò%Î°¨ÉxÉ MÉÉxvÉÉ®ÒvÉiÉ®É¹]ÅÉ¦ÉiÉÒxÉÉ EòlÉÉ{ÉÉjÉÉhÉÉ Ê¨ÉlÉÉ ¦ÉÉ¹ÉhÉ SÉÉt´ÉÉSÉEò¶É¤nÉ: +ÊvÉEòiÉªÉÉ p¹]ÅÉ ¶ÉCªÉxiÉ* iÉ¹ÉÉ SÉªÉxÉ¨É´É |ÉlÉ¨É EòÉªÉ¨É* iÉ¹ÉÉ SÉªÉxÉÉªÉ UÉत्रान् निर्दिशति। क्व, किम्, कथम्, कः, कुत्र, किमर्थम्, केन इत्यादीनां चोद्यवाचकशब्दानां चयनानन्तरं छात्राः वैयक्तिकरूपेण पाठभागमाधारीकृत्य यावच्छक्यं चोद्योत्तराणि लिखन्ति।

यथा -

1. ऊरुभङ्गं केन विरचितम्?
   ऊरुभङ्गं भासमहाकविना विरचितम्।
2. कः दुर्योधनम् अपातयत्?
   भीमसेनः दुर्योधनम् अपातयत्।
3. दुर्जयः कः?
   दुर्योधनस्य पुत्रोऽस्ति दुर्जयः।
4. भीमसेनः कथं दुर्योधनम् अपातयत्?
   भीमसेनः दुर्योधनस्य ऊरुं प्रभज्य तमपातयत्।
5. दुर्योधनः ऊरुं विदार्य क्व अपतत्?
   दुर्योधनः ऊरुं विदार्य कुरुक्षेत्ररणाङ्कणे अपतत्।

6. धृतराष्ट्रः केन रणाङ्कणमानीतः ?
   धृतराष्ट्रः दुर्जयेन रणाङ्कणमानीतः।

एवं यावच्छक्यं प्रश्नोत्तराणि विलिख्य छात्राः अवतारयन्ति। यश्छात्रः अधिकतया विलिख्य अवतारयति तं छात्रम् अध्यापकः अभिनन्दति। अनन्तरं छात्राः सङ्घरूपेण स्थित्वा प्रश्नोत्तरक्रीडां प्रचालयन्ति। एकस्मात् सङ्घात् एकः अपरेषु सङ्घेषु एकं प्रश्नं पृच्छति। छात्राणां यथावसरं साहाय्यं च दत्वा प्रश्नोत्तरक्रीडामध्ये अध्यापकः निरन्तरमूल्यनिर्णयञ्च करोति।

**मूल्यनिर्णयसूचकाः**

प्रश्नानां व्यक्तता

पूर्णवाक्येन उत्तरं वक्तव्यम्।

आशयपूर्णता।

**प्रवर्तनम् -3** नाटकस्य कथारूपेण परिवर्तनम्।

**उद्देश्यम्** - संस्कृतगद्यशैलीमनुसृत्य लेखनसामर्थ्यम्।

**प्रक्रिया-** सङ्घप्रवर्तनम्।

नाटके विद्यामानानां कथापात्राणां भाषणं छात्राः सम्यक् पठन्तु। अनन्तरं तेषु अन्तर्गतानां आशयानां सारांशं लघुकथारूपेण परिवृत्य लेखनाय अध्यापकः छात्रान् निर्दिशति। छात्राः सङ्घे स्थित्वा पाठभागं कथारूपेण परिष्कृत्य लिखन्ति। लेखनावसरे यत्र ते क्लेशमनुभवन्ति तत्र अध्यापकः सन्दर्भानुसारं साहाय्यं च ददातु। लेखनानन्तरं प्रतिसङ्घम् एकः लिखितं कथारूपम् अवतारयति।

**विशेषांशाः**

(क) **'क्व'** - इति अव्ययम् **कुत्र** अथवा **कस्मिन्** इत्यर्थे पाठभागे प्रयुक्तमस्ति।
अन्यत्र क्व शब्दौ महदन्तरं सूचयतः। ªÉIÉÉ - ®PÉ´É¶É

**"क्व सूर्यप्रभवो वंशः क्व चाल्पविषया मतिः"**। अत्र सूर्यवंश-कविप्रज्ञयोः विषय-विषयीभावे अत्यन्तमन्तरं भवतीति क्वशब्दस्य द्विरुक्त्या गम्यते। एवम् अत्यन्तमन्तरं प्रकाशयितुं क्वद्वयं प्रयुङ्क्ते।

**अपरमुदाहरणम्**

(1) "'vÉ¨É:VªÉÉÊiÉ: ºÉÊ±É±É¨É¯ûiÉÉ ºÉÊzÉ{ÉÉiÉ: **C´É** ¨ÉPÉ:?
ºÉxn¶ÉlÉÉ: **C´É** {É]ÛiÉò®hÉ: |ÉÉÊhÉÊ¦É: |ÉÉ{ÉhÉÒªÉÉ:**" - ¨ÉPÉnÚiÉ

(2) "तपः **क्व** वत्से ? **क्व** च तावकं वपुः? " - कुमारसम्भवे।

**(ख) पुत्र - पुत्रक इत्येतयोः सम्बोधनरूपयोः प्रयोगविशेषः**।

पाठभागे दुर्योधनं धृतराष्ट्रः **पुत्र** इति आह्वयति। गान्धारी **पुत्रक** इति। अत्र पुत्रक इति सम्बोधनायां पितरमपेक्ष्य मातुः पुत्रवात्सल्यमधिकतया अभिव्यनक्ति। तद्योतनाय **अनुकम्पायां सज्ञायां वा कन्** इत्यनेन **क** प्रत्यय इति विशेषः। एवम् अन्यत्रापि द्रष्टव्यम्।

## व्याकरणविशेषः

**महाराजः** नकारान्तस्य राजन् शब्दस्य समासान्तत्वाद् अकारान्तत्वं भवति **"राजाहःसखिभ्यष्टच्"** इति सूत्रेण।

राजा - राजानौ - राजानः - (इति सामान्यरूपाणि।)

महाराजः - महाराजौ- महाराजाः (इति समासान्ते रूपाणि)

-इति समासान्तन्वेन राजन् शब्दस्य अकारान्तबालशब्दवत् विभक्तिरूपाणि भवन्ति। एवं वृक्षराजः, पक्षिराजः, यक्षराजः, मृगराजः, नक्षत्रराजः - इत्यादिषु प्रयोगेष्वपि द्रष्टव्यम्।।

## अधिकवाचनाय।

भासमहाकविमधिकृत्य पूर्विकाणां कवीनामुक्तयः।

**जयदेवः-** यस्याश्चोरश्चिकुरनिकरः कर्णपूरो मयूरो
भासो हासः कविकुलगुरुः कालिदासो विलासः।
हर्षो हर्षः हृदयवसतिः पञ्चबाणस्तु बाणः
केषां नैषा कथय, कविताकामिनी कौतुकाय।।

**राजशेखरः** सूक्तिमुक्तावल्याम्-

भासनाटकचक्रेऽपि छेकैः क्षिप्ते परीक्षितुम्।
स्वप्नवासवदत्तस्य दाहकोऽभुन्न पावकः।।

**बाणभट्टः** स्वकीये हर्षचरिते-

सूत्रधारकृतारम्भैः नाटकैर्बहुभूमिकैः।
सपताकैर्यशो लेभे भासो देवकुलैरिव।।

## ।।भासनाटकचक्रम्।।

अनन्तपुरस्थराजकीयग्रन्थशालायाः प्राचीनसंस्कृतपुस्तकप्रकाशनाध्यक्षेण महामहोपाध्यायबिरुदधारिणा श्रीमता डा. टी. गणपतिशास्त्रिणा क्रिस्त्वब्दे 1901 तमे प्रथमतः प्रकाशितं भवति भासनाटकचक्रम्। तिरुवनन्तपुरं नाटकमिति च प्रसिद्धे अस्मिन् नाटकचक्रे त्रयोदशनाटकानि प्रकाशितानि। इतिहासपुराणादीनां तथा प्रसिद्धानामितरेषां च कथामाधारीकृत्य च विरचितेषु तेषु रूपकेषु उपलब्धानि एतानि सन्ति।

1. स्वप्नवासवदत्तम्।
2. प्रतिज्ञायौगन्धरायणम्।
3. प्रतिमानाटकम्।
4. अभिषेकनाटकम्।

5. कर्णभारः।
6. मध्यमव्यायोगः।
7. पञ्चरात्रम्।
8. दूतवाक्यम्।
9. दूतघटोत्कचम्
10. ऊरुभङ्गम्।
11. बालचरितम्।
12. अविमारकम्।
13. चारुदत्तम्।।

# सप्तमः पाठः
# सम्बन्धमाभाषणपूर्वकम्

**आमुखम्।**

कविकुलगुरुरिति प्रसिद्धस्य महाकवेः कालिदासस्य लघुत्रयी इति विख्याते काव्यत्रये प्रौढतमं काव्यमस्ति रघुवंशम्। एकोनविंशतिसर्गात्मके अस्मिन् महाकाव्ये सूर्यवंशभूपालकानां चरितमेव वर्णितम्। सर्वैश्वर्यपूर्णोऽपि कोसलेन्द्रो दिलीपः अनपत्यतया दुःखितस्सन् तत्परिहारार्थं पत्नीसमेतं कुलगुरुं वसिष्ठं प्राप्नोति। कामधेनोः शापमेव तस्य पुत्राराहित्यस्य कारणमिति विज्ञाय वसिष्ठः नन्दिनीसेवनाय राजानमादिदेश। नृपस्तु सर्वमपि भूभारं सचिवेषु निक्षिप्य पत्न्या सुदक्षिणया सह कामधेनुसुतां नन्दिनीम् असेवत। राजानं परीक्षितुकामा सा कामधेनुसुता एकविंशतितमे दिने हिमालयस्य कामपि गुहां प्रविवेश। तस्मिन् क्षणे कश्चित् मृगेन्द्रः तां सुरभीं बलादाचकर्ष। धेनोर्दयनीयाम् अवस्थां दृष्ट्वा राजा सिंहस्य वधाय समुत्सुकस्सन्नपि पराजितः। तदा सिंहः विस्मितं राजानं पुनरपि विस्मापयन् मनुष्यवाचा स्ववृत्तं निजगाद। सिंहात्सुरभिं रिरक्षुः दिलीपः स्वकीयं देहं प्रतिदानत्वेन स्वीकर्तुं सिंहं प्रार्थयामास। तस्मिन्नवसरे मृगराज-नरराजयोर्मिथोर्भाषणमेव पाठस्यास्य सन्दर्भः।

**पाठस्य नाम - सम्बन्धमाभाषणपूर्वकम्।**

**उद्देश्यम् - संस्कृतमहाकाव्यानां महाकवीनाञ्च परिचायने तात्पर्योत्पादनम्।**

**कालांशः - 15**

**आधारग्रन्थसूची - रघुवंशमहाकाव्यम्, संस्कृतसाहित्यचरित्रम्।**

| आशयः/ धारणाः/ व्यवहाररुपाणि | पठनप्रवर्तनानि/ पठनतन्त्राणि | पठनाधिगमाः |
|---|---|---|
